**अपरिष्कार** पु० अभावे न०त० । मार्ज्जनादिशोधनसंस्काराभावे । न०ब० । तच्छून्ये त्रि० ।

**अपरिष्टि** स्त्री अप+वैपरीत्ये रिष-हिंसायाम् क्तिन् । पूजायाम् हेम० । पूजायाञ्च हिंसाहेतुकद्वेषशून्यत्वात् तथात्वम् ।

**अपरिसमाप्ति** स्त्री अभावे न०त० । इयत्ताभावे समाप्त्यभावे च । न०ब० । तच्छून्ये त्रि० । [न०ब० । तच्छून्ये त्रि० ।

**अपरिसर** पु० अभावे न०त० । विस्ताराभावे प्रचाराभावे च

**अपरिहरणीय** त्रि० न परिहर्त्तुं शक्यते हृ-शक्याद्यर्थे कर्म्मणि अनीयर् । परिहर्त्तुमशक्ये, परिहर्त्तुमयोग्ये च ।

**अपरिहार्य्य** त्रि० न परिहर्त्तुमर्हति शक्यते वा हृ–ण्यत् । परिहर्त्तुमयोग्ये, परिहर्त्तुमशक्ये च ।

**अपरीक्षित** त्रि० न०त० । रूपवर्णपरिमाणादिना यथार्थतत्त्वानुसन्धानशून्ये "एतच्चापरीक्षितक्रयविषयमिति" मिताक्षरा परीक्षिते तु "परीक्षितं तु यत् क्रीतं तत् सर्वं न निवर्त्तयेदिति" तद्धृता स्मृतिः ।

**अपरीत** त्रि० न०त० । परितोऽव्याप्ते अनभिगते च "शवसाऽपरीता" इति ऋ० १,१००,२, "अपरीताः अपरैरनभिगता" इति भा० । अपरिगते, अपर्य्याप्ते च "अपरीतं न्वतो शव" इति ऋ० ८,२४,६, "अपरीतम् शत्रुभिरपरिगतमव्याप्तमिति वा" भा० ।

**अपरुष्** त्रि० अपगता रुट् यस्य । विगतक्रोधे "अपरुषा परुषाक्षरमीरितेति" रघुः ।

**अपरूप** न० अप आनन्दे आश्चर्य्ये वा प्रा०स० । आश्चर्य्यरूपे आनन्दहेतुप्रशंसितरूपे च । "ततोऽपरूपं जायते तस्माद्व्येष्वदेनस इति" अथ० १२,४,६, अपकृष्टरूपे च । प्रा०ब० । तद्वति त्रि० ।

**अपरेद्युस्** अव्य० अपरस्मिन् अहनि एद्युस् । अपरदिने इत्यर्थे "पूर्व्वेद्युरपरेद्युर्वा श्राद्धकर्म्मण्युपस्थिते निमन्त्रयेत विप्रान् वै" इति स्मृतिः ।

**अपरोक्ष** अव्य० न परोऽक्षम् इन्द्रियासन्निकृष्टम् । प्रत्यक्षे विषयेन्द्रियसन्निकर्षोत्पन्ने ज्ञाने "सम्भावनादिनिरासे तु विचारविपाकात्तेनैव प्रमाणेन जनितं ज्ञानं प्रतिबन्धाभावात् फलं जनयदपरोक्षमित्युच्यते" इति वृद्धाः । फलं ज्ञाततामिति भाट्टाः चितिबुद्धेः प्रतिविम्बमिति सांख्याः बुद्धौ चितः प्रतिविम्बमिति वेदान्तिनः । संस्कारम् विषयताविशेषं चेति तार्किकादयः । तथा हि प्रथममिन्द्रियेण विषयः संबध्यते ततो विषयालोचनारूपं विनिर्विकल्पकस्थानीयं सामान्याकारं ज्ञानं जायते ततः विषयावरणरूपप्रतिबन्धनाशात् चित्प्रतिविम्बरूपं फलं जनयज्ज्ञानमपरोक्षमित्युच्यते इति वेदान्तिनः । नैयायिकास्तु विषयेन्द्रियसन्निकर्षात् प्रथमं निर्विकल्पकरूपं विशेष्यविशेषणयोः संसर्गानवगाहि ज्ञानं जायते तदुत्तरं विषयप्रत्यक्षमित्यङ्गीचक्रुः । सांख्यादयस्तु विषयेन्द्रियसन्निकर्षात् बुद्धेस्तत्तद्विषयकारेण परिणामे जाते ततश्चेतनाशक्तौ बुद्धेः प्रतिविम्बरूपं फलमुत्पद्यते तत्रैव ज्ञानत्वव्यवहारोमुख्यः बुद्धिवृत्तौ तु गौण इति मन्यन्ते । "युक्तितोऽपि न बाध्यते दिङ्मोहरदपरोक्षादृते" सां०सू० । ब्रह्मणस्तु अज्ञानरूपावरणाभावात् सर्वदा प्रकाशमानत्वात् नेन्द्रियादिसन्निकर्षापेक्षेति तस्य सर्वदा प्रत्यक्षरूपत्वम् "यत् साक्षादपरोक्षाद्ब्रह्मेति" श्रुतिः अपरोक्षादपरोक्षमित्यर्थः । अर्श०अस्त्यर्थे अच् । तद्विषये त्रि० ।

**अपरोक्षानुभूति** पु० अपरोक्षा प्रत्यक्षा अनुभूतिर्यस्मात् । वेदान्तप्रकरणभेदे । कर्म० । प्रत्यक्षरूपे ज्ञाने स्त्री ।

**अपरोध** पु० अप+रुध–भावे घञ् । "बाधने अभिप्रयाय मभिषुखन्ति देशानपरोधेन" कात्या० २४,३,२१ ।

**अपर्णा** स्त्री नास्ति पर्णान्यपि वृत्तिसाधनानि यस्याः । शैलराजदुहितरि उमायां सा हि शिवप्राप्त्यर्थं व्रतकाले पर्णान्यपि त्यक्तवती यथोक्तं कुमारे "स्वयं विशीर्णद्रुमपर्णवृत्तिता परा हि काष्ठा तपसस्तया पुनः । तदप्यपाकीर्णमतः प्रियंवदाम् वदन्त्यपर्णामिति तां पुराविदः" इति "चतुर्थे त्यक्तपर्णा च अपर्णाख्यामवाप सेति" शि०पु० ।

**अपर्त्तु** त्रि० अपगत ऋतुर्यस्य । वसन्ताद्यृतुविगमयुक्ते । "यत्र विजायते यमिन्यपर्त्तुरिति" अथ०३,२८,१, अपगतऋतुः स्त्रीपुष्पं यस्याः । निवृत्तरजस्कायां स्त्रियां स्त्री ।

**अपर्य्यन्त** त्रि० नास्ति पर्य्यन्तोमर्यादा यस्य । निःसीमनि इयत्तारहिते "तदक्षयमपर्य्यन्तं दुर्ज्जयं वानरं बलम्" रा० ।

**अपर्य्याप्त** त्रि० परि+आप–क्त न०त० । असमर्थे, असम्पूर्णे, स्वकार्य्याक्षमे च 'परिभुक्तमवज्ञातमपर्य्याप्तमसंस्कृतम् यः प्रयच्छति विप्रेभ्यस्तद्भस्मन्यवतिष्ठतीति "अपर्य्याप्तं स्वकार्य्याक्षममिति शु०त० रघु० । अपरिच्छिन्ने इयत्तारहिते 'जगत्यपर्य्याप्तसहस्रभानुनेति" माघः "अपर्य्याप्तः अपरिच्छिन्न" इति मल्लि० ।

**अपर्य्याप्ति** स्त्री न पर्य्याप्तिः अभावार्थे न०त० । अपरिच्छेदे असामर्थ्ये च । "मुख्यं श्राद्धं मासिमासि अपर्य्याप्तावृतु प्रतीति" स्मृतिः । न०ब० । परिच्छेदशून्ये त्रि० ।

**अपर्य्याय** पु० न पर्य्यायः परिपटी अभावे न०त० । पक्रमाभावे । न०ब० । क्रमशून्ये त्रि० ।